Shri Raghunatha Temple MSS. Library,
JAMMU

ध० ३२

No. २६४२+ / क

Title रामनवमी पूजा

Author

Extent २८ पत्र Age सं. १८५०

Subject धर्मशास्त्र

रामनवमीपूजा

नं॰ १६४२

नं॰ ५२५४

6031

F — 16

Complete

Sharma

[illegible]

श्री रणवीर पुस्तकालय … श्री रघुनाथ
५
१६८२

अत्रषडंगाहि वैष्णवलक्षणमुच्यते सांगंसषडं
सन्यासंसङ्कषिद्धं दैवतंसदीक्षाविधिसयु
तंसंपत्कद्वादशाक्षरं अष्टाक्षरमथान्यं वा ये मंत्रं
समुपासते ते वा ते वैष्णवालोके विष्णवर्चन
रताः सदा सदीक्षाविधिसांगंवामंत्रराजसयंत्र
कं सहस्राक्षरसंयुक्तंमूलव्यूहादिभेदतः पं
चायतनतत्पंचये विप्राः समुपासते महावैष्ण
वसंज्ञास्तेमहाविष्णोरतिप्रिया इतिविष्णुपुरा
णे नचलतिनिजवर्णधर्मतोयः सममतिरात्म
मध्ये सुहृद्विपक्षेनहरतिनचहंतिकिंचिदुच्चैः स्थित
मनसंतमवेहिविष्णुभक्तं श्रीभागवतेत्रि
भुवनविभवहेतवेप्यकुंठस्मृतिरजितात्मसु
रादिभिर्विमृग्यात् नचलतिभगवत्पदारविं
व दाल्लवनिमिषार्धमपीहवैष्णवाग्र्यः इत्यादिरिति
वैष्णवलक्षणं अशक्तविषयेप्रतिनिध्यादिकं
तत्परिभाषायांद्रष्टव्यं रामार्चनचंद्रिकायांतु
नीक्षणमाहवागस्त्यः प्रकारः सोभिधीयते क्र
मेणयोजयेत्सर्वं सौकर्यार्थं चनार्थिनां षडक्षरा
दिकैराममंत्रैःस्यात्सज्जनंयथा सर्वेषांरामम
त्राणांमंत्रराजःषडक्षरःतारकंब्रह्मचेत्युक्तंते

नस्त्राप्रशाम्यते यद्वा गुरुमुखस्केनदीक्षाविद्धिम
जानतः वैयकस्याप्यभावे मूलमंत्रैर्भवेद्गुवं
अष्टम्यां चैत्रमासस्य शुक्लपक्षे जितेंद्रियः दंतधा
वनपूर्वं तु प्रातः स्नायाद्यथाविधि नद्यां तडागे
कूपे वा ह्रदे प्रस्रवणे तथा ततः संध्यादिकं कुर्या
त्संस्मरन् राघवं हृदि गृहमागत्य विप्रोसौ कुर्या
दौपासनादिकं दानेकुटंविनं विप्रं वेदशास्त्रर
तं सदा श्रीरामपूजानिरतं सुशीलं दंभवर्जितं
विधिज्ञं राममंत्राणां राममंत्रैकसाधकम् आहू
यभक्त्या संपूज्य वृणुयात्प्रार्थयन्निति श्रीराम
प्रतिमादानं करिष्येहं द्विजोत्तम तत्राचार्यो भव
प्रीतः श्रीरामोसि त्वमेव च इत्युक्त्वा सर्वयेत् विप्रं
स्नापयित्वा ततः स्वयं तैलनाभ्यंग्य च स्नायाद्वि
तयन् राघवं हृदि श्वेतांबरधरः श्वेतगंधमाल्या
निधायेत् अर्चितो भूषितश्चैव कृतमाध्याह्निक
क्रियः आचार्यं भोजयेत्पश्चात्सात्विकान्नैः सुवि
स्तरं भुंजीत स्वयमप्येवं हृदि राममनुस्मरन् न
वम्यामेकभक्तेन स्वगभूतेन राघव इक्ष्वाकुवंश
तिलक प्रीतो भव रघूत्तम इत्येकभक्तनिवेदन
मंत्रः एकभक्तेनतनवमस्तुक्तात्मकथाकोजरं

सार्द्धमुहूर्त्तमध्येकर्त्तव्यं एकभक्तव्रतीतत्रसदा
चार्योजितेंद्रियः शृण्वन्नामकथांदिव्यामहःशेषं
नयेन्मुने सायंसंध्यादिकाःकुर्यात्क्रियाराममनु
स्मरन् आचार्यसहितोराज्ञावधःशायीजितेंद्रियः
स्वपेत्स्वयंतथैकांतेश्रीरामार्पितमानसः आचा
र्यकरणेशक्तःस्वयंभुक्त्वास्वपेत्तथा इत्यष्टमी
कृत्यं अथनवमीकृत्यं तत्रैवततःप्रातःसमुत्था
यस्नात्वासंध्यांविधायच प्रातःसर्वाणिकर्माणि
शीघ्रमेवसमापयेत् उपोष्यंनवमींत्वद्ययामे
ष्वष्टसुराघव तेनप्रीतोभवत्वंवैसंसारात्त्राहिमां
हरे इत्युपवासनिवेदनमंत्रः ततःस्वस्थमनोभू
त्वाविद्वद्भिःसहितोनघ स्वगृहेचोत्तरेभागेयागमं
डपमारभेत् चतुर्द्वारंपताकाढ्यंसवितानंसुशोभ
नं मनोरमंमहोत्सौपंपुष्पाद्यैःसमलंकृतं शंखच
क्रहनूमद्भिःप्राग्द्वारेसमलंकृतं गरुत्मच्छार्ङ्गबा
णैश्चदक्षिणेसमलंकृतं गदाखड्गांगदैश्चैवपश्चि
मेसमलंकृतं पद्मस्वस्तिकमानैश्चकौवेरसमलं
कृतं मध्येहस्तचतुष्काद्यंवेदकांतुक्रमायतं वि
चित्रंनृत्यगीतैश्चवाद्यैश्चवस्त्रसंयुतं पुण्याहंवाच
येत्तत्रविद्वद्भिःप्रीतमानसैः तत्रसंकल्पयेच्चैवंरा
ममेवस्मरन् अस्यांरामनवम्यांतुरामाराधनतत्परः

रा० पू० २

2

उपोष्याष्टसु यामेषु पूजयित्वा यथाविधि इमं स्व
र्णमयीं रामप्रतिमां सम्प्रयत्नतः श्रीरामप्रीतये दा
स्ये रामभक्ताय धीमते प्रीतो रामो हरत्वाशु पापानि
सुबहूनि मे अनेकजन्मसंसिद्धान्यभ्यस्तानि महां
ति च इति त्रिभिः प्रतिमादाने संकल्पः शक्ताशक्ता
न्यशक्तस्य मूर्तिनिर्माणमुच्यते ततः स्वर्णमयीं राम
प्रतिमां पलमानतः निर्मितां द्विभुजां दिव्यां वामा
ङ्कस्थितजानकीं बिभ्रतीं दक्षिणकरे ज्ञानमुद्रां म
हामते वामेनात्मकरेणाग देवीमालिंग्य संस्थितां
सिंहासने राजते च पलद्वयविनिर्मिते अशक्तो यो
महाभाग तस्य वित्तानुसारतः पलेनार्द्धेन तदर्द्धेन
तदर्द्धार्द्धेन वा मुने ततोप्यशक्तो रौप्येण कारयेद्र
घुनंदनं लोहेन निर्मितं कुर्यान्न शिलया दारुणा
पि च यद्वा लेख्यं विलेप्यं वा मानरंकगतं हरिं को
मलांगं विशालाक्षमिंद्रनीलमणिप्रभं दक्षिणां
गं दशरथं पुत्रान्वेषणतत्परं पृष्ठतो लक्ष्म··दैवं स
हस्तच्छत्रसचामरं पार्श्वे भरतशत्रुघ्नौ तालवृन्तकरा
वुभौ अग्रेऽग्रे हनूमन्तं रामानुग्रहकांक्षिणं वित्त
शाठ्यमकृत्वैव मूर्तिं कुर्यात्प्रयत्नतः प्रतिमावि
शेषः कौलभे लैंगे समयः प्रसूतां कौशल्यां पितरं भ्रा
तृभिः सह सवर्णेन पृथक् कृत्वा श्रीरामं सीतया स

ह लक्षणोक्ताः सन्तूपास्ताः पूजयित्वा यथाविधी
सहेत्यनेन श्रीरामं वामांकस्थितं त्वं ज्ञायते प्रत
पवचंद्रिकायां ततः स्वर्णमयीमित्यादिनाप्रति
मानिर्माणमित्युक्तमिति भविष्ये विभवे सति
यो मोहान्न कुर्याद्विधिविस्तरं न तत्फलमवाप्नो
ति देवज्ञो हि सङ्ख्यते इति मूर्तिलक्षणं आसना
परि संविश्य पन्यासं जलं विधाय च शंखं प्रपूजये
दर्घ्यं गंधपुष्पाक्षतादिभिः कलशं वामभागस्थं
पूजाद्रव्याणि वादरात् पात्रं च प्रोक्षयेन्मंत्रज्ञा वा मा
नमंत्रमुच्चरन् विलिखेत्सर्वतोभद्रं वेदिकोपरि
संदरं तिर्यगूर्ध्वगता रेखाः कुर्यादेकोनविंशति
खंडेंदुः त्रिपदाः कोणेशृंखला पंचकोष्टिकैः एका
दशपदा वल्ली भद्रं तु नवभिः पदैः चतुर्विंशत्पदा
वापी परिधिर्विंशतिः पदैः मध्ये षोडशभिः कोष्ठैः
पद्मं वाष्टदलं स्मृतं सितेंदुः शृंखला कृष्णा वर्णि
नीलेन हरिता भद्रा रक्ता सिता वाप्यः परिधिः पीत
वर्णकः वाह्यंतरदले श्वेता कर्णिका पीतवर्णि
का खंडेंदुः शृंखलावापी वल्ली भद्रं तु पंचमं परि
ध्याविष्टि न पद्मं वाह्ये सत्वरजस्तमः सर्ववृत्ते स
मुद्दिष्टं सर्वतोभद्रमंडले मध्ये ब्रह्माणमष्टास्त

रा॰ पू॰ ६

दिक्षुसोमाधिदेवताः वायुसोमद्वयोर्मध्येवसूनष्टच
कारयेत् सोमईशानयोर्मध्येरुद्रानेकादशैवतु इंद्रई
शानयोर्मध्येआदित्यान्द्वादशैवतु इंद्राग्निमध्येचत
थाश्विनौसंपूजयेत्तथा आग्नेययमयोर्मध्येविश्वान्दे
वान्स्थापयेत्तकान् याम्यनैर्ऋत्ययोर्मध्येमरुद्गणांश्चका
रयेत् नैर्ऋत्यजलयोर्मध्येनागमूर्तांश्चकारयेत् आ
प्यवायव्ययोर्मध्येगंधर्वाप्सरसःकुरु ब्रह्मसोमद्वयो
र्मध्येरुद्रानेवचकारयेत् स्कंदनंदीवृषंशूलंमहादे
वंचकारयेत् ब्रह्मेशानद्वयोर्मध्येदक्षादीन्संप्रपूज
येत् ब्रह्मेंद्रयोस्तथामध्येदुर्गांविष्णुंतथैवच ब्रह्मा
ग्निमध्येचतथास्वधांचैवप्रपूजयेत् ब्रह्मणोनिर्ऋ
तेर्मध्येगणपंतप्रपूजयेत् वरुणब्रह्मयोर्मध्येआपः
संपूजयेत्तथा मध्येवायोर्ब्रह्मणश्चमरुतःसंप्रपू
जयेत् ब्रह्मणःपादमूलेतुमेदिनीतत्रकारयेत् का
वेरीनर्मदांचैवयमुनाचसरस्वती गंगाकृष्णातथा
गोदावरीसमाचसागराः तारक्षीरमधुसर्पिमेरे
क्षुदधिसंभवाः ब्रह्माजज्ञानमित्याद्यैर्मंत्रैःस्थाप्या
स्तुदेवताः गंधपुष्पादिभिःपूज्यादीपाद्यांश्चसर्वतः
सर्वत्रमंगलंयस्मात्तत्सर्वतोभद्रमुच्यते इतिसर्वतोभ
द्रं सप्तमंडलेनतन्मध्येत्रतत्रदेवतास्थापनपूजा

प्रयोगः तत्रमध्येब्रह्माणं ब्रह्मजज्ञानं गौतमवाम
देवोब्रह्मात्रिष्टुप्ब्रह्मस्थापनेपूजनेविनियोगः
एवमग्रेपिब्रह्मजज्ञानं उदीचीमारभ्यवायवीपर्यं
तंसोमादयोवायंताअष्टौलोकपालास्थापनीयाः
तत्र आप्यायस्व गौतमःसोमोगायत्रीॐआप्याय
स्वमः अभित्वाधीगतिःशुनःशेफईशानोजगती
अभित्वा देवसवितः इंद्रंवोमधुछंद इंद्रोगायत्री
ॐइंद्रोवोविश्वतः ॐअग्निंकोण्वोमेधातिथिरग्नि
र्गायत्रीअग्निदूतंयमायसोमं यमोयमोनुष्टुप्
यमायसोमंमोषुणोघोरःकण्वोनिरृतिर्गायत्री
ॐमोषुणःतत्वायामि शुनःशेफोवरुणस्त्रिष्टु
प् ॐतत्वायामि वायोशतं गौतमोवायुरनुष्टुप्
वायोशतंवायुसोममध्येअष्टौवसून्तत्थाश्चेत्रमै
त्रावरुणिर्वशिष्ठोवसवस्त्रिष्टुप् ज्मयाअत्रसो
मेशानमध्येएकादशरुद्रान् आरुद्रासः श्यावा
श्वएकादशरुद्राजगती ॐआरुद्रासः ईशानेंद्र
मध्येद्वादशादित्यान्त्याउसंमंदोमत्स्यामैत्रावरु
णिर्मान्योवावरुवोवामत्स्यान्तपयः द्वादशादित्या
गायत्री ॐत्यान्नुक्षत्रियान् इंद्राग्निमध्ये अश्विनारा
ऽगणोगोत्तमोश्विनावुष्णिक ॐअश्विनावर्तिः अ

ए पू ४

ग्नियममध्येविश्वेदेवान्सयैन्द्रकान् ओमासोमधुछंदा
विश्वेदेवागायत्री ॐमासः यमनिर्ऋतिमध्येसमयत्ता
न् अभित्यदेवंवामदेवासप्रयत्ताप्रकृतिः अभित्यंदेवं
सवितारमोण्योःकविक्रतुमर्चामि सत्यसवरत्नधा
मभिप्रियंमतिंकविमूर्धीयस्यामतिर्भाअदि द्युतत्स
वीमनिहिरण्यपाणिरमिमीतसुक्रतुंकृपास्वः निर्ऋ
ति वरुणमध्येभूतेनागान् आयंगौःसार्पराज्ञीस
र्पीगायत्रीउँआयंगौः वरुणवायुमध्येगंधर्वाप्सरसः
अप्सरवातरशानमोंगंधर्वाप्सरसोनिष्टुप् ॐअप्सर
सांगंधर्वाणांयत्रअन्यग्रेथेष्ठअप्सरसामेतशाकर
ष्मृंगरस्सक्तेनस्मावानुक्रमविरोधादुपेक्ष्यं ब्रह्म
सोममध्येस्कंदनंदीश्वरशूलमहाकालान् कुमारं
कुमारस्कंदस्त्रिष्टुप् उकुमारंमाः ऋषभंऋषभोवै
राजाऋषभोनुष्टुप् ॐऋषभंमाब्रह्मेशानमध्येद
क्षादीन्सप्तअदितिर्लौक्यो बृहस्पतिर्दक्षोनुष्टुप्
अदितिर्ह्यजनिष्टब्रह्मेंद्रमध्येदुं नामग्निवर्णां सौ
भाग्निर्दुर्गास्त्रिष्टुप् ॐतामग्निवर्णां इदंविष्णुःकाण्
वोमधातिथिर्विष्णुगायत्री ॐइदंविष्णुर्वि· ब्रह्मा
ग्निमध्येस्वधां उदीरतांशंखःस्वधास्त्रिष्टुप् ॐउदी
रतमवरतमवराउत् ब्रह्मयमनमध्येरुद्रोगान्

परंमृत्योः संकुसुको मृत्युरोगास्त्रिष्टुप् ओं परंमृत्यो
अनुपरेहि ब्रह्मनिर्ऋतिमध्ये गणपतिं गणानां त्वा
गृत्समदो गणपतिर्जगति ओं गणानां त्वा ब्रह्म
वरुणमध्ये अपः शन्नो देवीरंबरीषः सिंधुद्वीआ
पोगायत्री शन्नोदेवीः ब्रह्मवायुमध्ये मरुतः मरु
तो यस्य राहूगणो मरुतो गायत्री ओं मरुतो यस्य
ब्रह्मणः पादमूले कर्णिकायां पृथ्वी स्योना मेधा
तिथिर्भूमिर्गायत्री ओं स्योना पृथ्वी तत्रैव गंगादि
नद्यः इमंमेसिंधुक्षित्प्रैयमेधाऽपो नद्योजगती
इदंमेगंगेयमुने तत्रैव सप्त सागरान् धाम्नोराजत्रि
नवरुणावोऽस्तु च यदापो अघ्न्या इति वरुणेति शा
प्यामहे ततो वरुणनोऽस्तु च मैवापो मोषधीर्हिंसी
रतो विश्वन्यभूत्वे तो वरुणनोऽस्तु च मैवापो मोष
धीर्हिंसी रतो विश्वन्यभूत्वे तो वरुणनो मुंच तदुप
रिमेरवेनमग्निनाग्रमेरुम् ततो मंडलाद्बहिः सो
मादिसमीपे तु क्रमेणायुधानि गदा त्रिशूलवज्र
शक्तिदंडखड्गपासेअंकुशान् तहाल्ले पुनरपि तेनैव
क्रमेण गोतमं भरद्वाजं विश्वामित्रं कश्यपं जमद
ग्निं वसिष्ठं अत्रिं अरुंधतीं तहाल्ले पूर्वादौ ऐंद्रीकौ
मारी वाराही चामुंडा वैष्णवी माहेश्वरी विनाय

ग्र कींनाममंत्रैःपूजयेत् अथमंत्रः ॐब्रह्मयज्ञानंप्र
पू॰ थमंपुरस्ताद्विसीमतः सुरुचोवेनआवः सबुध्न्या
५ उपमाअस्यविष्ठाःसतश्चयोनिमसतश्चविवः १ आ
प्यायस्वसमेतुतेविश्वतः सोमवृष्ण्यंभवावाजस्यस
ङ्गथे २ अभित्वादेवसवितरीशानंवार्याणां सदाव
न्भागमीमहे ३ इन्द्रंवोविश्वतस्परिहवामहेजनेभ्यः
अस्माकमस्तुकेवलः ४ अग्निंदूतंवृणीमहेहोता
रंविश्ववेदसंअस्ययज्ञस्यसुक्रतम् ५ यमायसोमं
सुनुतः ६ मोषुणःपरापरानिर्ऋतिर्दुर्हणावधी
त् यदीष्टस्तृष्णयासह ७ तत्वायामिब्रह्मणावंद
मानस्तदाशास्तेयजमानोहविर्भिः अहेडमानोव
रुणेहवोध्युरुशंसमानआयुःप्रमोषीः ८ वायो
शतंहरीणांयुवस्वयोष्याणां उतवातेसहस्रि
णोरथआयातुपाजसा ९ जायाअत्रवसवोरंतदे
वाउरावंतरिक्षेमर्जयंतशुभ्राः अर्वाक्पथःउरु
ज्रयःकृणुध्वंश्रीनाहूतस्यजग्मुषोवोअस्य १० आ
रुद्रासइंद्रवंतःसजोषसोहिरण्यरथाःसुविता
यगंतन इयंवोअस्मत्प्रतिहर्यतेमतिस्तृष्णजेन
दिवःउत्साउदन्यवे ११ त्वांतुत्वाश्रियांअवआदित्या
न्वाविषामहे सम्रडीकांअभिष्टये १२ ओमासश्च

र्षणीधृतोविश्वेदेवासऽआगतदाश्वांसोदाशु
षःसुतं १३ अभित्यंदेवंसवितारमोण्योः कविक्र
तुमर्चामिसत्यसवंरत्नधामभिप्रियंमतिंकविं
ऊर्ध्वायस्यामतिर्भाअदिद्युतत्सवीमनिहिरण्यपा
णिरमिमीतसुक्रतुःकृपास्वः १४ आयंगौःपृश्निर
क्रमीदसदन्मातरंपुरःपितरञ्चप्रयन्त्स्वः १५ अप्स
रसांगंधर्वीणांमृगाणांचरणेचरन् केशीकेतस्य
विद्वान्त्सखास्वादुर्मदिंतमः १६ कद्रुद्रायप्रचेतसे
मीढुष्टमायतव्यसे वोचेमशंतमंहृदे १७ कुमा
रंमाताय्ववतिःसमुब्धंगुहाविभर्त्तिनददातिपित्रे
अनीकमस्यनमिनज्जनासःपुरःपश्यंतिनिहित
मरतौ १८ ऋषभंमासमानानासपत्नीनोविषास
हिं हंतारंशत्रूणांकृधिविराजंगोपतिंगवां १९
अदितिर्ह्यजनिष्टदक्षयादुहितातव तांदेवाअन्व
जायंतभद्राअमृतबंधवः २० तामग्निवर्णांतप
साज्वलंती २१ इदंविष्णुर्विचक्रमे २२ उदीरता
मवरउत्परास २३ परंमृत्योअनुपरेहिपंथांय
स्तेस्वइतरोदेवयानात् चक्षुष्मतेशृण्वतेतेब्र
वीमिमानःप्रजांरीरिषोमोतवीरान् २४ गणा
नांगणपतिंहवामहेकविंकवीनामुपमश्रवस्तमं

रा॰
पू॰
८
6

ज्येष्ठराजंब्रह्मणांब्रह्मणस्पतिं आनश्शृन्वंनोतिभिःसीद
सादनं २५ शंनोदेवीरभिष्टये॰ २६ मरुतोयस्यहिक्षये
पाथादिवोविमहसः ससुगोपातमोजनः २७ स्योना
पृथिविभव २८ इमंमेगंगेयमुनेसरस्वतीशुतुद्रिस्तो
मंसचतापरुष्ण्या असिक्न्यामरुद्वृधेवितस्तयार्जी
कीयेशृणुह्यासुषोमया २९ धाम्नोधाम्नोराजन्नितोव
रुणनोमुंचं यदापोअघ्न्यावरुणेतिशपामहेततोवरु
णनोमुंच ३० इतिसर्वतोभद्रमंत्राः तदङ्कितेतत्रसारे अ
थैकेकल्पयेयंत्रंलिखेन्मध्येदलाष्टके षट्कोणान्तर्ग
तेतत्रवेददारोपशोभिते कमलरताकारस्त्वाद्यान्त
तीयंततनपवम्भूतंभूतात्द्वितीयंततश्चतुर्थं चतुर्थं
मायंपुनरेवमेवयोगोभवेदष्टदलंचपद्ममितिअर्थो
दकैः पूर्णकुंभरेखोदरंशुभं हृतपल्लवपुष्पैश्चयुक्तं
संस्थाप्यचार्चितं सौवर्णेराजतेताम्रपात्रेषट्कोण
मालिखेत् अलाभेविल्वपाठेवाकलशोपरिसंस्थि
ते स्थाप्योपरिवस्त्रयुग्ममच्छिन्नंसदशंशुभं दिव्यसिंहा
सनेतत्रस्थापयित्वार्चयेत्सुधीः ॐनमोभगवतेविश्व
वेसर्वभूतात्मनेवासुदेवायसर्वात्मसंयोगपद्मपीठा
त्मनेनमः इतितन्मंत्रेणतन्मध्येकुर्यात्सार्घ्यांजलिंपुनः
इतिपीठार्चांकृत्वापाद्यादिकंदद्यात् स्नानेपंचामृते

नच लेप्यादेर्नाभिषेकस्याद्द्याद्यज्ञोपवीतकम् त
तः संस्थाप्य पीठे तं पूजां कुर्याद्यथाविधि आवाहनं
स्थापनं च सन्निधापनमेव च सन्निरोधनमेवं स्याद
वरोधनमंजसा ततमुद्राभिरेवं स्याद्देवं संप्रार्थ्य भ
क्तितः नानारत्नविचित्राणि दद्यादाभरणानि च हि
मांबुचूर्णहरिचंदनसारसमन्वितं गंधं दद्यात्स्वय
त्नेन साग्रहं च सकुंकुमं कल्हारकेतकीजातीपुंना
गाद्यैः प्रपूजयेत् चंपकैः शतपत्रैश्च चंदनैः सुमनो
हरैः हूतपल्लवपुष्पैश्च दूर्वाभिस्तुलसीदलैः को
मलैर्विल्वपत्रैश्चाप्यशोककुसुमैस्तथा रामस्य ज
ननी चासि रामात्मकमिदं जगत् अतस्त्वां पूजयिष्या
मि लोकमातर्नमोस्तु ते इति कौसल्यायां नमो द
शरथायेति पूजयेत्पितरं तथा इति पितृपूजनं त
तो नुज्ञाप्य देवेशं परिवारान्समर्चयेत् पूर्वं षट्को
णकोणेषु हृदयादीनि षट्क्रमात् तथावरणं
हनूमंतं च सुग्रीवं भरतं सविभीषणं लक्ष्मणांग
दशत्रुघ्नजांबवंतं दलेष्विमान् द्वितीये धृष्टिं ज
यंतं विजयं सुराष्ट्रं राष्ट्रवर्द्धनं अकोपं धर्मपालं च
सुमंतं दलमध्यतः तृतीये दलाग्रे लोकपालांश्चर
तिचतुर्थे तदस्त्राणि ततो वहिः पंचमं नाममंत्रै

र्नमस्कारचतुर्थ्याभ्यां प्रसृजयेत् चेटाचवादयन्लक्ष्मीपंदी
पंचास्मै निवेदयेत् भक्ष्यभोज्यादिनाभक्त्यानैवेद्यंवि
धिनाचरेत् आचमनंसतांबूलंमहानीराजनंततः न
मस्कुर्यात्ततः स्तोत्रैः स्तुत्वाचपूजयेन्मंत्रं शृण्वन्जयं
तीमाहात्म्यंदिव्यांरामकथांतथा राममंत्रैः समंयामे
नयेद्राममनुस्मरन् शंखवाद्यावाहनादींचकुर्याद्यामे
गतेद्वितः रामोद्वितीयसंभूतोमध्याह्नेजन्मभावये
त् उक्तस्थेग्रहपंचकेस्वरराशौइत्यादिमंत्रैर्वैवादयेद्वा
घान्दयाद्वैजगत्पतेः फलपुष्पाढ्यं संपूर्णं गृहीत्वा
शंखमुज्वलं अशोककुसुमैर्युक्तंचतुलसीदलैः
दशाननवधार्थायधर्मसंस्थापनायच दानवानांवि
नाशायदैत्यानांनिधनायच परित्राणायसाधूनांजा
तोरामःस्वयंहरिः गृहाणार्घ्यंमयादत्तंभ्रातृभिःस
हितोनघ इत्यर्घ्यमंत्रः पुनःपुष्पांजलिंदत्वायामेया
मेगतेद्वितः सृजयेद्विधिवद्भक्त्यादिवारात्रेनयेद्बुध
इति इतिरामनवमीविधायकसंग्रहः अथव्रतपद्ध
तिः तत्रादावष्टम्यांदंतधावनपूर्वकं नद्यादौस्नात्वा
नित्यंनिर्वर्त्याचार्यावरणंकुर्यात् तत्रमंत्रः श्रीराम
प्रतिमादानंकरिष्येहंद्विजोत्तम तत्राचार्योभवश्री
तः श्रीरामोपित्वमेवचेति आगतंस्नापयित्वास्वयंतै

लेनाभ्यंजनविप्रंसात्विकान्नैर्भोजयित्वास्वयंभुंजीत
ततोनवम्यां एकभक्तेनश्रीरामभूतेनराघव इक्ष्वाकु
वंशतिलकप्रीतोभवरघुद्वहेत्येकभक्तंनिवेद्यसायं
संध्यां कृत्वाआचार्यसहितोरात्रावधःशयनेकुर्य्या
त् इत्यष्टमीकृत्यपद्धतिः ततःनवम्यांप्रातःसमु
त्थायपर्णादिभिर्गेडूषैस्मुखंसंशोध्यनद्यादिषु
स्नात्वासंध्यांविधायनित्यपूजनादिशीघ्रमेवनि
र्वर्त्य ततःसूर्यःसोमोयमःकालःसंध्येभूतान्यहः
क्षपा पवनोदिक्पतिर्भूमिराकाशंखचरानराः ब्राह्म
शासनमास्थायकल्पध्वमिहसन्निधिमितिमंत्रेण
सूर्यादिदेवताभ्योव्रतंनिवेद्य अपसर्पंतुयेभूताये
भूताभुविसंस्थिताःयेभूताविघ्नकर्तारस्तेनश्यंतु
शिवाज्ञयेतिमंत्रेणभूतान्युत्सार्य ॐमद्यसोपवा
सेरामनवमीव्रतमहंकरिष्ये उपोष्येनवमींत्व
द्यपापेभ्यष्टस्वराघव तेनप्रीतोभवत्वंभोसंसारा
त्राहिमांहरे इत्युक्त्वार्घ्यपात्रस्थंसपुष्पाक्षतंजलंक्षिपे
त् ततःचतुर्द्वारपताकारम्यमित्यादिनाष्टवंशयुक्ते
शोत्वचक्रादिभिरलंकृतेचतुर्हस्तवेदिकायुक्तेहस्त
मात्रवेदिकायुक्तंवामंडपंविधायतन्मध्येसर्वतोभ
द्रंकमलंवाविलिख्यतत्रकुंभस्थापनंकुर्यात् त

रा॰
पू॰
८

8

त्रक्रमः आदौगणपतिपूजनंमातृकापूजनं पुण्या
हवाचनंचकृत्वामहीद्यौरितिभूमिंस्पृष्ट्वा ओंओषधय
इतिपद्यान्निक्षिप्य तत्रआकालेष्वितिकलशंसंस्थाप्य
इमंमेगंगइतिजलेनापूर्यगंधद्वारामितिगंधंयाओष
धीरितिसर्वौषधीःकांडादितिदूर्वाः अश्वत्थेवपंचप
ल्लवान्स्योनाःपृथिवीतिसप्तमृदःयाःफलिनीरि
तिफलंसहिरत्नानीतिपंचरत्नानिहिरण्यरूपइति
हिरण्यंचनिक्षिप्ययुवासुवासाइतिवस्त्रेणावेष्ट्य पू
र्णादर्वीतिपूर्णपात्रंनिधाय तत्रत्वायामीतिवरु
णंसंपूज्य कलशस्यमुखइतिपठेत् इतिकलश
स्थापनविधिः ततःकलशोपरिसौवर्णादिपात्रेअ
ष्टकोणमालिख्य तदुपरिसदशामहतेवस्त्रयुग्मेस्व
र्णसिंहासनेस्थापयेत् ततःश्रीरामस्मरणंकृत्वा
अस्यांरामनवम्यांतुरामाराधनतत्परः उपोष्याष्ट
यामेषुपूजयित्वायथाविधिः इमांस्वर्णमयींरामप्र
तिमांसंप्रयत्नतः श्रीरामप्रीतयेदास्येरामभक्ता
यधीमते प्रीतोरामोहरत्वाशुपापानिसुबहूनिमे
अनेकसंविद्धान्यभ्यस्तानिमहांतिच इतित्रिभिर्व्रत
संकल्पंकुर्यात् अशक्तस्तुइमांपात्रमयीमितिपठे
त् स्वर्णादिमय्यामग्न्युत्तारणंलेख्यादौतुनास्ति तत

आसने पृथ्वीति मंत्रेण उपविश्य पस्थाय: कूर्मायन
म: आधारशक्तये पृथ्वि विद्यावर्णापद्मसिंहासनाय नम
इति पूजयेत् अपक्रमंत्विति पठित्वा पार्ष्णिघातत्रयं
कृत्वा भूतसंघानुत्सार्य ॐ रः अस्त्राय फट् इत्युक्त्वा
करास्फालनेन छोटिकाभिश्च सर्वदिग्बंधनं कृत्वा
स्ववामे गुरुभ्यो नमः दक्षिणे गणपतये नमः मध्ये
स्वेष्टदेवतायै इति नत्वा तालत्रयं कृत्वा पुनः ॐ रः
अस्त्राय फट् इत्युच्चार्य दक्षिणहस्ते जलं गृहीत्वा स्वा
स्थानं परितः शमयन् अग्निप्राकारमुद्वाव्य अग्निप्रा
कारं भावयेत् ततः भूतशुद्धिं प्राणप्रतिष्ठां केवलमा
तृकान्यासं च कृत्वा केशवादिमातृकान्यासं कुर्यात्
ॐ केशवादिमातृकान्यासस्य साध्यनारायण ऋषिः
गायत्री छंदः लक्ष्मीनारायणो देवता हलो बीजं स्व
रा शक्तिः एतन्मंत्रांगत्वेन न्यासे विनियोगः अंगुष्ठा
दिषट्सु स्थानेषु वक्ष्यमाणषडंगमंत्रैर्न्यासं विधा
य हृदयादिषु न्यसेत् ॐ श्री ॐ नमो नारायणाय हं
सः सोहं अं कं खं गं घं ङं आं ह्रीं हंसः सोहं ॐ नमो ना
रायणाय क्रुद्धोल्काय स्वाहा ॐ श्रीदेव्यै नमः हृदया
य नमः ॐ नमो नारायणाय हंसः सोहं इं चं छं जं झं ञं
ईं ओं ह्रीं हंसः सोहं ॐ नमो नारायणाय महोल्काय

ग. सू. ५

स्वाहा श्रीपद्मिन्यै नमः शिरसे स्वाहा ॐ नमो नारायणा
यहंसः सोहं डं टं ठं डं ढं णं डुं ॐ ह्रीं हंसः सोहं ॐ नमो ना
रायणाय वरोल्काय स्वाहा श्रं विष्णुपत्न्यै नमः शिखा
यै वषट् ॐ नमो नारायणाय हंसः सोहं पं तं थं दं धं नं
पं ॐ ह्रीं हंसः सोहं नमो नारायणाय ज्वल्काय स्वाहा
श्रैं वरदायै नमः कवचाय हुं ॐ श्रीं ॐ नमो नारायणा
यहंसः सोहं श्रों पं फं बं भं मं श्रों ॐ ह्रीं हंसः ॐ नमो
नारायणाय सर्वोल्काय स्वाहा श्रौं कमलारूपायै न
मः इति नेत्रं ॐ श्रीं तुं नमो नारायणाय हंसः सोहं श्रं
यं रं लं वं शं षं सं हं लं क्षं श्रः ॐ ह्रीं हंसः सोहं तुं नमो ना
रायणाय अनंतोल्काय स्वाहा त्रः शूलिन्यै नमः इति
अस्त्र इति केशवादिमातृकान्यासं षडंगं ततो ध्यानं
विद्यारविंदमकुरामृतकुंभपद्मकामोदकी दरसुदर्शी
नशोभिहस्तं सौदामिनीमुकुरकांतिविभाति लक्ष्मीना
रायणात्मकमखंडितमादिमूर्तिवपुरितिशेषः वामा
यः करमारभ्य दक्षिणायः करपर्यंतमायुधक्रमो त्रवो
यव्यः ॐ ह्रीं श्रीं क्लीं श्रं क्लों श्रीं ह्रीं ॐ केशवाय कांत्यै नमः
शिरसि ॐ ह्रीं श्रीं क्लीं श्रं क्लीं श्रं ह्रीं ॐ नमो नारायणा
य कांत्यै नमः मुखवृत्ते ॐ ह्रीं श्रीं क्लीं श्रीं ह्रीं ॐ माधवा
य तुष्ट्यै नमः दक्षनेत्रे ॐ ह्रीं श्रीं क्लीं ह्रीं ॐ गोविंदाय पुष्ट्यै

नमः वामनेत्रे श्रंह्रींश्रींॐक्लींश्रांह्रीं ॐविस्वरू
प्यैनमः दक्षकर्णे ॐह्रींश्रींक्लीं ॐह्रींश्रीं ॐम
धुसूदनायशान्त्यैनमः वामकर्णे ॐह्रींश्रींक्लींत्रं
क्लीं श्रींह्रीं ॐत्रिविक्रमायैनमः दक्षनासापुटे
ॐह्रींश्रींक्लीं अंक्लींश्रींह्रीं ॐवामनायदयायैनमः
वामनासापुटे श्रींह्रींॐश्रीधरायमेधायैनमः द
क्षगंडे ॐह्रींश्रींक्लींलंक्लींश्रींह्रीं ॐहृषीकेशाय
हर्षायैनमः वामगंडे ॐह्रींक्लींपंक्लींह्रीं ॐपद्म
नाभायश्रद्धायैनमः ऊर्ध्वोष्ठे ॐह्रींश्रींक्लींपंक्लींश्रीं
ह्रीं ॐदामोदरायलज्जायैनमः अधरोष्ठे ॐह्रींश्रीं
क्लींश्रींह्रीं ॐवासुदेवायलक्ष्म्यैनमः ऊर्ध्वदंतपं
क्तौ ॐह्रींश्रींक्लींश्रोंक्लींश्रांह्रीं ॐसंकर्षणायसर
स्वत्यैनमः अधोदंतपंक्तौ ॐह्रींश्रींक्लींअंक्लींश्रीं
ह्रीं ॐप्रद्युम्नायप्रीत्यैनमः मूर्ध्नि ॐह्रींश्रींअःक्लीं
श्रींह्रीं ॐअनिरुद्धायरत्यैनमः मुखे ॐह्रींश्रींक्लीं
कंक्लींश्रींह्रीं ॐचक्रिणेजयायैनमः दक्षबाहुमू
ले ॐह्रींश्रींक्लींखंक्लींश्रींह्रीं ॐगदिनेदुर्गायैनमः
दक्षकूर्परे ॐह्रींश्रींक्लींगंक्लींश्रींह्रीं ॐशार्ङ्गिणे
ममायैनमः दक्षमणिबंधे ॐह्रींश्रींक्लींयंक्लींय
क्लींश्रींह्रीं ॐखड्गिनेसत्यायैनमः दक्षांगुलीमू

ले ॐह्रींश्रींक्लींउंक्लींश्रींह्रीं ॐपुराविनेवंद्यायैनमः
रतांगुल्यग्रेषु ॐह्रींश्रींक्लींवंक्लींश्रींह्रीं ॐहंसिनेवा
ण्यैनमः वामबाहुमूले ॐह्रींश्रींक्लींछंक्लींश्रींह्रीं ॐ
हसालिनेविलासिन्यैनमः वामकर्परे ॐह्रींश्रींक्लीं
श्रींह्रींजं ॐशूलिनेविजयायैनम वाममणिबंधे ॐह्रीं
श्रींक्लींश्रांह्रींडं ॐपाशिनेविरजायैनमः वामांगुलि
मूले ॐह्रींश्रींक्लींजंश्रंकुशिनेविश्वायैनमः वामांगु
ल्यग्रे ॐह्रींश्रींक्लींटंक्लींश्रींह्रीं ॐमुकुंदायविमदा
यैनमः दक्षोरुमूले ॐह्रींश्रींक्लींउंक्लींश्रींह्रीं ॐनं
दनायस्वनंदनायैनमः दक्षजानुने ॐह्रींश्रींक्लींडं
क्लींश्रींह्रीं ॐनंदिनेस्मृत्यैनमः दक्षगुल्फे ॐह्रींश्रीं
टंक्लींह्रींनरायकृष्णैनमः दक्षपादांगुलिमूले ॐ
ह्रींश्रींक्लींणंक्लींश्रींह्रीं ॐनरकजितेसमृद्ध्यैनमः
दक्षांगुल्यग्रेषु ॐह्रींश्रींक्लींतंक्लींश्रींह्रीं ॐहरयेशु
द्ध्यैनमः वामोरुमूले ॐह्रींश्रींक्लींथंक्लींश्रींह्रींॐ
कृष्णायबुद्ध्यैनमवामजानुनी ॐह्रींश्रींदंक्लींदंक्लीं
श्रींह्रीं ॐसत्यायभक्त्यैनमः वामगुल्फे ॐह्रींश्रींक्लीं
धंक्लींश्रींह्रीं ॐसत्वातायमत्यैनमः वामपादांगुलि
मूले ॐह्रींश्रींनंक्लींश्रींह्रीं ॐशौरिणेक्षमायैःवामा
गुल्यग्रेषु ॐह्रींश्रींक्लींपंक्लींश्रींह्रींॐशूरायपरमा

यैनमः दक्षपार्श्वे ॐ ह्रीं श्रीं ऊं क्लीं फं क्लीं श्रीं ह्रीं ॐ जना
र्दनाय उमायै वामपार्श्वे ॐ ह्रीं श्रीं क्लीं वं क्लीं श्रीं ह्रीं ॐ
भूधराय क्लेदिन्यै पृष्ठे ॐ ह्रीं श्रीं क्लीं भं क्लीं श्रीं ह्रीं ॐ वि
श्वमूलये क्लिन्नायैः नाभौ ॐ ह्रीं श्रीं क्लीं मं क्लीं श्रीं ह्रीं
ॐ वैकुंठाय वसुदायै नमः जठरे ॐ ह्रीं श्रीं क्लीं यं क्लीं
ह्रीं त्वगात्मने पुरुषोत्तमाय वसुधायै नमः हृदये
ॐ ह्रीं श्रीं क्लीं रं क्लीं श्रीं ह्रीं ॐ असृगात्मने बलिने पर
यै नमः दक्षांसे ॐ ह्रीं श्रीं क्लीं लं क्लीं श्रीं ह्रीं ॐ मांसात्म
ने बलानुजाय परायणायै नमः ककुदि ॐ ह्रीं श्रीं
क्लीं वं क्लीं श्रीं ह्रीं ॐ मेदात्मने बलाय सूक्ष्मायै वामां
से ॐ ह्रीं श्रीं क्लीं शं क्लीं श्रीं ह्रीं ॐ अस्थ्यात्मने वृषघ्नाय
संध्यायै नमः हृदादिदक्षकराग्रपर्यंतं ॐ ह्रीं श्रीं षं
क्लीं श्रीं ह्रीं ॐ मज्जात्मने वृषाय संध्यायै नमः हृदा
दिवामकरपर्यंतं ॐ ह्रीं श्रीं क्लीं सं क्लीं श्रीं ह्रीं शुक्रात्म
ने हंसाय प्रभायै हृदादिदपादांतं ह्रीं श्रीं क्लीं हं श्रीं ह्रीं
प्राणात्मने वराहाय निशायै नमः हृदादिवामपा
दांतं ॐ ह्रीं श्रीं क्लीं लं क्लीं श्रीं ह्रीं ॐ शक्त्यात्मने वि
मलाय अमोघायै नमः हृदादिनाभ्यंतं ॐ ह्रीं श्रीं
क्लीं क्षं क्लीं श्रीं ह्रीं ॐ परमात्मने नृसिंहाय विद्युतायै
नमः हृदादिमूर्द्धांतं यद्वा प्रणवादिकामबीजपूर्व

रा॰
पू॰
११

क्रमात्स्वकाद्यन्तरादीन्वा केशवादिकीर्त्यादीनमोंतात्मकेन्
इति केशवादिन्यासः अन्येचवैष्णवमंत्रन्यासास्तु रामार्च
नरत्नाकरेज्ञेयाः अथ शंखस्थापनं तत्रातिसूक्ष्मप्रका
रेणेनसमीपे अस्त्रेण शंखं प्रक्षाल्य हृन्मंत्रेण पूरयेत्
पूजयेत्प्रणवेनैव सामान्यार्घ्यमिदं स्मृतं अथ विस्तरे
ण शंखप्रतिष्ठा सामान्यार्घोदकेन स्वपुरतः त्रिकोण
षट्कोणचतुरस्रमंडलं कृत्वा आधारशक्तये कूर्मा
य अनंताय पृथिव्यै नम इति संपूज्य शंखमुद्रां प्रद
र्श्य गंधपुष्पाद्यैः आग्नेये हृदयाय नमः नैरृते शिर
से स्वाहा वायव्ये शिखायै वषट् ईशाने कवचाय हुं
मध्ये नेत्राभ्यां वौषट् सर्वदिक्षु अस्त्राय फट् इति मं
डलं संपूज्य मूलेन त्रिपरदिकां प्रक्षाल्य रं अग्निमंडला
य दशकलात्मने श्रीरामाय पात्रासनाय नमः इति
मंडलोपरि आधारं प्रतिष्ठाप्य तत्र पूर्वादिदिक्षु उप
र्यपश्च अग्रे दशकलाः पूजयेत् पूर्वे यं धूम्रार्चिषे न
मः आग्नेये रं ऊष्मायै नमः दक्षिणे लं ज्वलिन्यै नमः
नैरृत्ये वं ज्वालिन्यै नमः पश्चिमे शं विस्फुलिंगिन्यै
नमः वायव्ये षं सुश्रियै नमः उत्तरे सं सुरूपायै नमः ई
शान्ये हं कपिलायै नमः पूर्वेशानयोर्मध्ये लं हव्यवा
हायै नमः पश्चिमेनैरृत्यमध्ये क्षं कव्यवहायै नमः

ति ततः अर्घ्येण शंखं प्रक्षाल्य सं सूर्यमंडलाय द्वाद
शकलात्मने श्रीरामार्घ्यपात्राधाराय नमः इति
पात्राद्याधारे निधाय शं शंखोपरि हंसाकारेण सूर्य
स्य द्वादशकलाः पूजयेत् पूर्वादिप्रादक्षिण्येन कं
भं तपिन्यै नमः खं बं तापिन्यै नमः गं फं धूम्रायै नमः
घं पं मरीच्यै नमः ङं नं ज्वालिन्यै नमः चं धं रुच्यै नमः
छं दं सुषुम्नायै नमः जं थं भोगदायै नमः झं तं वि
श्वायै नमः ञं णं बोधिन्यै नमः टं ढं धारिण्यै नमः
ठं डं क्षमायै नमः इति ततस्तीर्थोदकेन हं लं हं सं
शं वं लं रं यं मं भं बं फं पं नं धं दं थं तं णं ढं डं ठं जं झं छं
चं ङं घं गं खं कं अः औं ओं ऐं एं ॡं ऌं ॠं ऋं ऊं उं ईं इं
आं अं मूलमंत्रं च जप्त्वा शं शंखमापूर्य उं सोममंड
लाय षोडशकलात्मने श्रीरामार्घ्यामृताय नम
इति संपूज्य तत्र चंद्रकलाः पूजयेत् अं अमृतायै न
मः आं मानदायै नमः इं पूषायै नमः ईं तुष्ट्यै नमः
उं पुष्ट्यै नमः ऊं रत्यै नमः ऋं धृत्यै नमः ॠं शशि
न्यै नमः ऌं चंद्रिकायै नमः ॡं कान्त्यै नमः एं ज्यो
त्स्नायै नमः ऐं श्रियै नमः ओं प्रीत्यै नमः औं अं
गदायै नमः अं पूर्णायै नमः अः पूर्णामृतायै नम
इति ततः ब्रह्मांडोदरतीर्थानि करैः स्पृष्टानि तेर

रा॰ वे तेन सत्येन मे देव तीर्थं देहि दिवाकर गंगे च यमुने चै
पू॰ व गोदावरि सरस्वति नर्मदे सिंधु कावेरि जलेऽस्मिन्सन्नि
१२ धिं कुरु इति सूर्यमंडलात्तीर्थं अंकुशमुद्रयाऽऽवाह्य
12 शंखे संयोज्य गंधपुष्पाद्यैः शंखजलं समभ्यर्च्य शंखे
पाणिना लंदत्वा मूलमंत्रमष्टधा जपेत् तज्जलं चिन्म
यं संचिन्त्य अस्त्रमंत्रेण संरक्षयेत् मुद्रयाऽमृतीकृत्य
शंखमुद्रां रुंडमुद्रां च प्रदर्श्य परमीकृत्य गंधपुष्पाभ्यां
शंखं संपूज्य तेन जलेन देवं आत्मानं पूजाद्रव्याणि
च प्रोक्षयेत् इति शंखप्रतिष्ठा ततः शंखोत्स्वीदिग्रा
दक्षिणेन अर्घ्यपाद्याचमनीयमधुपर्कादि सामान्या
र्घविधिना स्थापयेत् ततः वामभागस्थकलशं पूजा
द्रव्याणि च प्रोक्षयेत् अथांतर्यागः स्वदेहे मंडूकादि
न्यासं कृत्वा स्वहृदये पद्मकंदसमुद्भूतं ज्ञाननाल
सुशोभनं ऐश्वर्याष्टदलं पद्मं परं वैराग्यकर्णिकं
तस्मिन्पीठे चिदात्मानं राघवं च स्वरूपिणं ध्यात्वा मा
नसैर्धूपदीपाद्यैः संपूज्य नैवेद्यावसरे किंचिज्जपं
कृत्वा गुह्यातीति मंत्रेण जपं समर्पयेत् ततः स्वाधिष्ठान
गतत्रिकोणकुंडे प्रज्वलितं चिदग्निं ध्यात्वा बिंदुनाद
प्रणवेनाहंतादिकं हुत्वा ततः पूजाहोमादिकं देव
कृतं यत्तदनुग्रहात् तेन प्रीतो भवत्वं भोः सुहंमे

मानसंकुरु इतिमंत्रेणश्वासमार्गेणनंनेजरश्मुक्ता
आत्मानंसमर्पयेत् ततस्तन्मयःसच्चिदानंदमयो
भूत्वाक्षणंतिष्ठेत् इत्यंतर्यागः अथपीठपूजास्ववा
मभागे श्रीगुरुभ्योनमः दक्षिणेगणपतयेमध्येस्वे
ष्टदेवतायैपीठमध्येॐमंडूकायनमः कालाग्निरु
द्रायकूर्मायनमः आधारशक्त्यैनमः अनंतायन
मः पृथिव्यैनमः क्षीरसागरायनमः रत्नदीपायन
मः रत्नमंडपायनमः कल्पवृक्षेभ्योनमः रत्नवेदि
कायैनमः रत्नसिंहासनायनमः इतिउपर्युपरि
संस्थाप्यधर्मायनमः आग्नेयेज्ञानायनमः नैरृत्ये
नमः वैराग्यायनमः वायव्येऐश्वर्यायनमः ईशा
न्येअधर्मायनमः पूर्वेअज्ञानायनमः दक्षिणेअ
वैराग्यायनमः पश्चिमेअनैश्वर्यायनमः उत्तरेत
तोमध्ये आनंदकंदायनमः संविन्नालायनमः स
र्वतत्त्वकमलासनायनमः प्रकृतिमयपत्रेभ्योन
मः विकृतिमयकेसरेभ्योपंचाशद्वर्णायैकर्णिका
यैनमः अंअर्कमंडलायद्वादशकलात्मनेनमः
ॐसोममंडलायषोडशकलात्मनेनमः यंवह्नि
मंडलायदशादशकलात्मने संसत्त्वायनमः रंर
जसेनमः तंतमसेनमः आंआत्मनेनमः अंअंत

रा रात्मनेनमः पंपरमात्मनेनमः ह्रींज्ञानात्मनेनमः माया
पू॰ तत्वायनमः कलातत्वायनमः वियातत्वायनमः परतत्वा
१३ यनमः ॐकाराद्यायैनमः मोंतायोगपीठायकैकोपरिप
13 रिपूजयेत् ततःपूर्वादिप्रादक्षिण्येननवशक्तीःपूजयेत्
विमलायैनमः पूर्वेउत्कर्षिण्यैनमः आग्नेयेज्ञानायैनमः
दक्षिणेक्रियायैनमः नैर्ऋत्येयोगायैनमः पश्चिमेप्रह्वै॰
वायव्येसत्यायैनमः उत्तरेईशानायैनमः ईशान्येअनुग्र
हायैनमः मध्येततः पुष्पांजलिंगृहीत्वा पीठमंत्रेणपु
ष्पांजलिंदद्यात् ॐनमोभगवतेविस्नवेसर्वभूतात्म
नेवासुदेवायसर्वात्मसंयोगपद्मपीठात्मनेनमः त
तःमध्यान्हेजन्मभावयेत् उच्चस्थग्रहपंचकेसुरगुरौ
सेंदौनवम्यांतिथौ लग्नेकर्कटकेपुनर्वसुयुतेमेषंग
तेपूषणि निर्दग्धुंनिखिलाःपलाशसमिधोमध्यादयो
ध्यारणे राविर्भूतमभूतपूर्वविभवंयत्किंचिदेकंमहः
ततःस्वीकृतमूर्ति श्रयोध्यानगरेरम्येरत्नमंडपमध्यगे
स्मरेत्कल्पतरोर्मूलेरत्नसिंहासनंशुभं तन्मध्येष्टदले
पद्मेनानारत्नप्रतिष्टिते मातुरंकगतंराममिंद्रनील
मणिप्रभं कोमलांगंविशालाक्षंविद्युद्वर्णवराननं भा
नुकोटिप्रतीकाशंकिरीटेनविराजितं रत्नग्रैवेयकेयूर
रत्नकुंडलमंडितं रत्नकंकणमंजीरकटिसूत्रैरलंकृतं

श्रीवत्सकौस्तुभोरस्कं मुक्ताहारोपशोभितं दक्षिणांगे द
शरथं पुत्रान्वेषणतत्परं पार्श्वे भरतशत्रुघ्नौ तालवृंतक
रावुभौ अग्रे व्यग्रं हनूमंतं रामानुग्रहकांक्षिणं एवंवि
धं ससीतं रामं ध्यात्वा पुष्पांजलिं गृहीत्वा मूलमुच्चार्य आ
त्मसंस्थमजं शुद्धं त्वामहं परमेश्वर अरण्यामिव हव्या
शं मूर्त्तावावाहयाम्यहं इति मंत्रं पठेत् सहस्रशीर्षे
त्यावाह्यावाहनीमुद्रां प्रदर्शयेत् ततः तवेयं महिमा मू
र्त्तिस्तस्यां त्वां सर्वगं प्रभो भक्तिस्नेहसमाकृष्टं दीपवत्स्था
पयाम्यहमिति पठित्वा स्थापनीमुद्रां प्रदर्शयेत् सर्वा
न्तर्यामिणं देवं सर्वबीजमयं शुभं स्वात्मस्थमयं शुद्ध
मासनं कल्पयाम्यहमित्युक्त्वा पुरुष एवेत्यासनं अस्मि
न्वरासने देव सुखासीनो ऽक्षरात्मक प्रतिष्ठितो भवेश
त्वं प्रसीद परमेश्वरेत्युक्त्वोपवेशनं अथ सन्निधापनं
अनन्यात्तव देवेश मूर्त्तिशक्तिरियं प्रभो सान्निध्यं कुरु त
स्यां त्वं भक्तानुग्रहतत्पर इत्युक्त्वा मूलांते सन्निधापनं
सन्निधापिनीमुद्रां प्रदर्शयेत् अथ सन्निरोधनं आज्ञा
पात तव देवेश कृपांभोधे गुणांबुधे आत्मानंदैकतृप्त
त्वां निरुणध्मि पितर्गुरो इत्युक्त्वा मूलांते सन्निरोधिनी
मुद्रां प्रदर्शयेत् अज्ञानाद्दुर्मनस्काद्वा वैकल्यात्साध
नस्य च यद्यदपूर्णं भवेत्कृत्यं तथाप्यभिमुखो भवेत्

क्राभिमुखीमुद्रयासंमुखीकरणं दृश्यापीष्टवर्षिण्याप्र
रयन्यज्ञविष्टरं मूर्त्तौवायज्ञसंहर्त्तौस्थितोभवमहेश्वरेति
प्रार्थनामुद्रयाप्रार्थना अभक्तवाङ्मनश्चक्षुःश्रोत्रदूरांतरे
युते स्वतेजःपंजरेणाशुवेष्टितोभवसर्वतइति अवगुंठन
मुद्रयाअवगुंठनं ततोदेवदेहे षडंगेनसकलीकरणंधेनुमु
द्रयाऽमृतीकरणं महामुद्रयापरमीकरणं ततोदीपिन्यावि
धयादीपनं साचयथामूलमंत्रंपठित्वा ऐंवदवदवाग्वा
दिनिऐंक्लिंक्लिन्नेक्लेदिनिक्लेदयमहाक्षोभंकुरुकुरु क्लीं
सौमहाक्षोभंकुरुकुरुसौंः ह्सौः इतिअकारादिक्षकारांता
नांमातृकानामुच्चार्य अर्घोदकेनदेवंत्रिःप्रोक्ष्यदेवस्यहृद
यंस्पृष्ट्वा प्राणप्रतिष्ठांकुर्यात् सायथा ॐआंह्रींक्रोंयंरंलं
वंशंषंसंहंहंसः सोहंश्रीभगवतःप्राणाइहप्राणा ॐआं
ह्रींक्रोंयंरंलंवंशंषंसंहंहंसः सोहंभगवतोजीवइहस्थितः
ॐआंह्रींक्रोंयंरंलंवंशंषंसंहंहंसः सोहंभगवतोवाङ्मनश्च
क्षुःश्रोत्रघ्राणप्राणाइहागत्यसुखंचिरंतिष्ठंतुस्वाहा यस्य
दर्शनमिच्छंतिदेवाःस्वाभीष्टसिद्धये तस्मैतेपरमेशायरा
मायस्वागतंनमः कृतार्थोनुगृहीतोस्मिसफलंजीवितंम
मआगतोदेवदेवेशःसुस्वागतमिदंपुनः मूलांतेश्रीरा
मस्वागतोभवततः शंख१ चक्र २ गदा ३ पद्म ४ धेनु ५
कौस्तुभ ६ गरुड ७ श्रीवत्स ८ वनमाला ९ योनि १० मु

द्राः प्रदर्श्य पुष्पांजलिं गृहीत्वा मूलांते श्रीरामाय सायुधा
य सवाहनाय सपरिवाराय सशक्तिकाय पुष्पांजलिं
परिकल्पकल्पयामि नमः इति समर्पयेत् यद्भक्तिले
शसंपर्कात्परमानंदसंभवः तस्मै ते चरणाब्जाय पाद्यं
शुद्धाय कल्पते एतावानस्येति मूलांते श्रीरामाय पाद्यं
परिकल्पयामि नमः पाद्यं पादपद्मयोर्दद्यात् तापत्रय
हरं दिव्यं परमानंदलक्षणं तापत्रयविनिर्मुक्तं तवार्घ्यं
कल्पयाम्यहं त्रिपादूर्ध्वः मूलांते श्रीरामाय इदमर्घ्यं स्वा
हा इत्यर्घ्यं शिरसि दद्यात् वेदानामपि वेदाय देवानां देव
तात्मने आचमनं कल्पयामीशाशुद्धानां शुद्धिहेतवे त
स्माद्विराडमूलांते श्रीरामाय इदमाचमनीयं स्वधा आ
चमनं मुखे दद्यात् सर्वकालेष्वहीनाय परिपूर्णसुखात्म
ने मधुपर्कमिमं देव कल्पयामि प्रसीद मे मूलांते श्रीरामा
य मधुपर्कं मुखे दद्यात् उच्छिष्टोप्यशुचिर्वापि यस्य स्मरण
मात्रतः शुद्धिमाप्नोति तस्मै ते पुनराचमनीयं कल्पयामि इति पुन
राचमनं दद्यात् स्नेहं गृहाण स्नेहेन लोकनाथ महायश
सर्वलोकेषु शुद्धात्मन्ददामि स्नेहमुत्तममिति स्नेहं समर्प
णं ततः सुगंधद्रव्यादिनोद्वर्तनं कारयित्वा उष्णोदकेन
शुद्धांबुना वा स्नापयेत् अथ पंचामृतस्नाने आप्यायस्वे
ति पयः दधिक्राव्ण्ण इति दधि घृतं मिमिक्षत इति घृतं मधु
वाता इति मधु स्वादुः पवस्वेति शर्करा ततः परमानंदबो
धाब्धिनिमग्ननिजमूर्तये सांगोपांगमिदं स्नानं कल्पया
म्यहमीशाते द्रवितेन च शुद्धेन सर्वगंधजलेन च सर्वो

रा॰ दकस्नानं ततः मूलेन शंखोदकेनाभिषिच्य पुनराचमनी
पू॰ यं यस्य शक्तित्रयेणेदं संप्रोतमखिलं जगत् यज्ञसूत्राय त
२५ स्मै ते यज्ञसूत्रं प्रकल्पयेत् तस्माद्यज्ञात्सर्वहुतः संभृतमि
15 त्युपवीतं स्वभावसुंदरांगाय नानाशक्त्याश्रयाय ते भूष
णानि विचित्राणि कल्पयाम्यमरार्चितेति भूषणानि हि
मांबुरेन सारागुरुकुंकुमद्रुतं गंधं कनिष्ठया समर्पयेत्
परमानंदसौभाग्यपरिपूर्णदिगंतर गृहाण परमं गंधं
कृपया परमेश्वर तस्माद्यज्ञात्सर्वहुत गंधमिति दत्वा तु
रीयवनसंभूतं नानागुणमनोहरं अमंदसौरभं पुष्पं गृ
ह्यतामिदमुत्तममिति पठित्वा तस्मादश्वा इति पुष्पं दत्वा
पुष्पांजलित्रयं दद्यात् ततश्चंदनतत्पुष्पादिभिः सी
तां सकौशल्यां पूजयेत् रामस्य जननी चासि रामात्मक
मिदं जगत् अतस्त्वां पूजयिष्यामि लोकमातर्नमोस्तु ते
ततः नमो दशरथायेति दशरथं संपूज्य लक्ष्मणभरत
शत्रुघ्नौ च संपूज्य हनुमंतं पूजयेत् ततः आवरणपूजा
र्थमनुज्ञाप्य षडंगपूजनं कुर्यात् इति प्रथमावरणम्
हनूमंतं च सुग्रीवं भरतं सविभीषणं लक्ष्मणंगदं शत्रु
घ्नं जाम्बवंतं दलेष्विमान् द्वितीये धृष्टिं जयंतं विजयं
सुराष्ट्रं राष्ट्रवर्धनं अकोपं धर्मपालं च सुमंतं दलमध्य
तः तृतीयं दलाग्रे लोकपालांश्च वज्राद्यं तदस्त्राणि ततो
बहिः पंचमे ततः पुष्पांजलिं दत्वा वनस्पतिरसोपेतो गं
धाढ्यः सुमनोहरः आघ्रेयः सर्वदेवानां धूपोयं प्रतिगृ
ह्यतां यत्पुरुषं व्यदधुरिति धूपं दद्यात् स्वप्रकाशो महा

दीपःसर्वतमस्तिमिरापहः सबाह्याभ्यंतरंज्योतिर्दीपोयंप्र
तिगृह्यतां ब्राह्मणोस्येतिदीपं अथनैवेद्यं मूलनास्त्रा
यफडितिचसंप्रोक्ष्यचक्रमुद्रयाभिरक्ष्यमूलेनाष्टधाभिमं
त्र्यधेनुमुद्रांचप्रदर्श्य मूलेनाभिमंत्र्यदक्षिणहस्तेउदक
मादाय शालीभक्तंशाशिकरराशितंपायसंसूपसूपंले
ह्यंपेयंसुचोष्यंसितममृतफलंघारिकाद्यंसखाद्यं आ
ज्यंप्राज्यंसमिज्यंनयनरुचिकरंराजिकेलामरीचं स्वादी
पःशाकराजीपरिकरममृताहारजोषंजुषस्व हेमपा
त्रेगतंदिव्यपरमान्नसंस्कृतं पंचधाषड्रसोपेतंगृहा
णपरमेश्वर चंद्रमामवसद्गतिनैवेद्यंनिवेद्य अमृतोप
स्तरणमसीतिजलंदत्वा प्राणायस्वाहेत्यादिपंचग्रासा
न्विकचोत्पलमुद्राभिःग्राहयित्वा नमस्तेदेवदेवेशस
र्वतृप्तिकरंपरं अखंडानंदसंपूर्णं गृहाणजलमुत्तममि
तिमध्येपानीयंदत्वा मध्येजवनिकांकृत्वाब्रह्मशाद्यैः
परितउरुभिःसूपविष्टैः समेतोलक्ष्म्यासिंजद्वलयकर
पासादरंवीज्यमानः नर्मक्रीडाप्रहसनपरोहासयन्यं
क्तिभाक्तन्भुंक्तेपात्रेकनकघटितेषड्रसंश्रीरमेशइतिप
ठित्वा यस्मिंस्तारत्नकामडुमविभवभुवांमंडनंमंडलानां
सर्वासांसंपदांपत्रिजगतिजगतांमंगलंमंगलानां है
मामत्रस्थंहवीर्दधिमधुलवणैर्हेममुद्रार्पंचार्थ्यैर्नीरा
ज्योरामचंद्रोदिनकरकरजिद्रत्नदीपावलीभिः इतिध्या
त्वायथाशक्तिजलंकृत्वा अमृतापिधानमसीत्युत्तरापो
शनंदत्वा विष्वक्सेनायनमः इतिउच्छिष्टशेषंदत्वा हस्तौ
प्रक्षाल्यकरोद्वर्तनंदद्यात् इदंफलमितिफलंपूंगीफल

रा मिति तांहृत्स्थं हिरण्यगर्भं निदद्दिणां सुकुटायाम्नूपणा
पू· निछत्रचामरादीनापरिकल्प्यमहानीराजनं कुर्यात् नाम्या
१८ श्रीसीदितिनमस्कारान्मसास्यामहितिप्रदद्दिणां यसेवेति
पुष्पांजलिं च दत्वा भगवन्प्रसीदेतिनमस्कृत्यस्तवीत ध्ये
16 यं सदापरिभवघ्नमभीष्टदोहंतीर्थास्पदं शिवविरंचिनुतं
शरण्यं भृत्यार्तिहं प्रणतपालभवाब्धिपोतं वंदे महापु
रुषतेचरणारविंदं त्यक्त्वासुदुस्त्यजसुरेप्सितराजलक्ष्मी
धर्मिष्ठआर्यवचसायदगादरण्यं मायामृगंदयितयेप्सि
तमन्वधावद्वंदे महापुरुषतेचरणारविंदं २ श्रीरामचं
द्ररघुपुंगवराजवर्यराजेंद्ररामरघुनायकराघवेश रा
जाधिराजरघुनंदनरामभद्रदासोहमद्यभवतःशरणा
गतोस्मि यस्यामलंन्टपसदस्सुयशोधनायगायंत्यजस्र
ऋषयोदिगिभेंद्रपट्टाः ततःकपालवसुपालगिरीष्टजु
ष्टपादांबुजंरघुपतेःशरणंप्रपद्ये नमोब्रह्मण्यदेवायरा
मायाकुंठमेधसे उत्तमश्लोकधुर्यायन्यस्तदंडार्पितांघ्र
ये इंदीवरदलश्यामोरामोराजीवलोचनः वर्तितेमान
सेयस्यास्तांसीतांप्रणमाम्यहं ततःपुष्पांजलिंदत्वाक
पिसुंदंविधायप्रार्थयेत् यदात्रयासर्वगताहृतानेथ्याने
नचेतः परताहृतानेभस्तन्यानपावाक्यरताहृतानेक्ष
मस्वसर्वंममदेवदे अज्ञानादथवाज्ञानादशुभंयन्म
याकृतं क्षंतुमर्हसितत्सर्वंदास्येनचगृहाणमां श्रीगो
विंदमुकुंदकेशवशिवश्रीवल्लभश्रीनिधेश्रीवैकुंठवस
कुंठकुंठितखलसामित्रकंठोदय सुहृत्प्रपविधृतेधू
र्तेपवलक्ष्मीमापवायोतज सहावहविधेहिनस्त्वपिधि

पंपीडंपरित्रीयर त्वमेवभक्तिजनयस्त्वमेवमामुद्धरा
स्मात्पतितंभवाब्धेः क्लिष्टंकृपालोनदयास्तिचित्तेचे
नर्हिहाकर्मवशोहतोस्मि राजास्यादित्यपंचास्यपा
क्लिसिंहास्यरूपवान् समक्तेनेनसर्वात्मरामःप्रीणा
तुविहृयुः ततःउत्तरार्घ्यंदद्यात् फलपुष्पौघसंपूर्णं
गृहीत्वाशंखमुज्वलं अशोककनककुसुमैर्युक्तंचतु
लीदलैः अर्घ्यमेतत्स्तदशाननवधार्थायधर्मसंस्था
पनायच परित्राणायसाधूनांजातोरामःस्वयंहरिः
गृहाणार्घ्यंमयादत्तंभ्रातृभिःसहितोनघेति ततः
यामेयामेपुष्पांजलिंदत्वायथाशक्तिपूजयित्वाप
रेजापारणंकुर्यात् इतिरामनवमीपूजाविधिः ॥

जन्म मध्ये लिखा १९५० चैत्रशुक्लाष्टम्यां

नं. ११५९